# ॥ रङ्गनाथस्तोत्रम् ॥

सप्तप्राकारमध्ये सरसिजमुकुलोद्भासमाने विमाने
कावेरीमध्यदेशे फणिपतिशयने शेषपर्यङ्कभागे।
निद्रामुद्राभिरामं कटिनिकटशिरः पार्श्वविन्यस्तहस्तं
पद्माधात्रीकराभ्यां परिचितचरणं रङ्गराजं भजेऽहम् ॥

आनन्दरूपे निजबोधरूपे
ब्रह्मस्वरूपे श्रुतिमूर्तिरूपे।
शशाङ्करूपे रमणीयरूपे
श्रीरङ्गरूपे रमतां मनो मे ॥ १ ॥

कावेरितीरे करुणाविलोले
मन्दारमूले धृतचारुचेले।
दैत्यान्तकालेऽखिललोकलीले
श्रीरङ्गलीले रमतां मनो मे ॥ २ ॥

लक्ष्मीनिवासे जगतां निवासे
हृत्पद्मवासे रविबिम्बवासे।
कृपानिवासे गुणबृन्दवासे
श्रीरङ्गवासे रमतां मनो मे ॥ ३ ॥

ब्रह्मादिवन्द्ये जगदेकवन्द्ये
मुकुन्दवन्द्ये सुरनाथवन्द्ये।
व्यासादिवन्द्ये सनकादिवन्द्ये
श्रीरङ्गवन्द्ये रमतां मनो मे ॥ ४ ॥

ब्रह्माधिराजे गरुडाधिराजे
वैकुण्ठराजे सुरराजराजे।
त्रैलोक्यराजेऽखिललोकराजे
श्रीरङ्गराजे रमतां मनो मे ॥ ५ ॥

अमोघमुद्रे परिपूर्णनिद्रे
श्रीयोगनिद्रे ससमुद्रनिद्रे।
श्रितैकभद्रे जगदेकनिद्रे
श्रीरङ्गभद्रे रमतां मनो मे ॥ ६ ॥

स चित्रशायी भुजगेन्द्रशायी
नन्दाङ्कशायी कमलाङ्कशायी।
क्षीराब्धिशायी वटपत्रशायी
श्रीरङ्गशायी रमतां मनो मे॥७॥

इदं हि रङ्गं त्यजतामिहाङ्गं
पुनर्नचाङ्गं यदि चाङ्गमेति।
पाणौ रथाङ्गं चरणेम्बु गाङ्गं
याने विहङ्गं शयने भुजङ्गम्॥८॥

रङ्गनाथाष्टकं पुण्यं
प्रातरुत्थाय यः पठेत्।
सर्वान् कामानवाप्नोति
रङ्गिसायुज्यमाप्नुयात् ॥

॥इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्री-गोविन्द-भगवत्पूज्य-पाद-शिष्यस्य श्रीमच्छङ्करभगवतः कृतौ श्री-रङ्गनाथाष्टकं सम्पूर्णम्॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Ranganathashtakam.

generated on **August 16, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits